॥ श्रीरामः शरणम् ॥

प्रतिगुरुवासरं
प्रकाश्यते

सम्पादकः
डा. कृष्णप्रसादः जि.

आदिशिला

साप्ताहिकी आदिशिलापत्रिका

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥

प्रथमखण्डस्य | श्री विश्वावसु संवत्सर माघ फाल्गुन २०२६ | प्रथमसङ्ख्या

आदिशिलापत्रमञ्जूषा-३

प्रतिषेधविचारः

संपादकः - प्रह्लादः
सप्तम्यां कक्ष्यायामधीयानो विद्यार्थी

संस्कृतभाषा बहुविस्तृता। तत्र विषयराशिः विद्यते। तस्मिन्नन्यतमः विषयः प्रतिषेधाभिधः। तस्मिन् किञ्चिदिव लिलेखिषे।

तत्सम्बन्धिन्यः कारिकाः -

द्वौ नञौ तु समाख्यातौ पर्युदास-प्रसज्यकौ।
पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत् ॥ १ ॥

प्राधान्यं तु विधेर्यत्र प्रतिषेधेऽप्रधानता।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥ २ ॥

अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता।
प्रसज्यस्तु स विज्ञेयः क्रियया सह यत्र नञ् ॥ ३ ॥

प्रतिपित्सितः प्रतिषेधः द्विधः। पर्युदासप्रतिषेधः प्रसज्यप्रतिषेधश्चेति। प्रतिषेधः निषेधः।

पर्युदासप्रतिषेधः -

तत्राद्यस्य विवक्षायां विधेरेव प्राधान्यं भवति,नतु निषेधस्य। यथा "अब्राह्मणमानय" इति। अत्र हि आनयनं विधिः। तस्यैव प्राधान्यम् भाति। अब्राह्मणस्य क्षत्रियादेरानयनात्। अयं नञ् (निषेधः) सदा उत्तरपदेन अन्वितस्तिष्ठति। अपि च अब्राह्मणमानयेत्युक्तौ नहि विप्रभिन्नस्य पाषाणादेरानयनम् भवति, परम् ब्राह्मणभिन्नस्य क्षत्रियादेरेव।अतः पर्युदासे नञः निवारितपदार्थसादृश्येऽप्यन्वयो बोध्य इत्यवश्यमवधेयोऽयमंशः ॥

तत्रैव कानिचनोदाहरणानि - १. दूरादस्पर्शनम् वरम्।
२. जीवत्यनाथोऽपि वने विसर्जितः।
३. पुत्रः शत्रुरपण्डितः।
४. समुद्रमासाद्य भवन्त्यपेयाः।
५. नाप्राप्यमभिवाञ्छन्ति।

प्रसज्यप्रतिषेधः -

द्वितीयस्य तु निषध एव प्रधानता। यथा "न कुर्यान्निष्फलं कर्म" इति। अत्र हि निष्फलं कर्म न कुर्यादिति करणस्य निषेध एव प्राधान्यं विवक्ष्यते। एवमेव "अनृतं न वक्तव्यम्" इत्यादि। अत्रापि वचनस्या निषेधे प्रधानता। अत्र नञ् क्रियया सार्धमन्वितस्तिष्ठति।

तत्रैव कानिचनोदाहरणानि - १. न व्यापारशतेनापि शुकवत्पाठ्यते बकः।
२. न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।
३. शत्रुणा न हि सन्दध्यात्।
४. एवं पुरुषकारेण विना दैवं न सिद्ध्यति।

पर्युदास्यायं विशेषः। पर्यदासो हि समस्तमेव दरीदृश्यते। अस्ति तथापि पयुदासस्य समस्तत्वापवादः। तथाहि- पाणिनीये 'अनचि च' इत्यन्यतमत्सूत्रम्। तत्रा'नचि' इति समासेऽपि प्रसज्य एवायम्। एवमेव 'सुडनपुसकस्य' इत्यापि।

शब्दापशब्दविवेकः

<मूलम्>24. आसुरं कुलमनादरणीयं लीलया भवजलं तरणीयम्।

व्याख्या - अनादरणीयम् इति प्रतिषेधार्थकेन नञा समासो न युक्तः। नादरणीयमित्येवं व्यासेन वक्तव्यम्।